ध्रुव
वैदिक संदर्भ
ॐअथैतां चितां चिन्वन्ति । - - तस्य नासिकयोस् स्रुवौ निदध्याद् दक्षिणहस्ते जुहूं स्वय उपभृतम् उरसि ध्रुवां - - - जै.ब्रा. १.४८
ॐऔदुम्बरी स्थापना : उद् दिवं स्तभानान्तरिक्षं पृण पृथिवीम् उपरेण दृंह । द्युतानस् त्वा मारुतो मिनोतु मित्रावरुणयोर् ध्रुवेण धर्मणा । - जै.ब्रा. १.७२
ॐराष्ट्रं वै द्रोणकलशो विशो ग्रावाण: । यद् द्रोणकलशश् शिथिलस् स्याद् राष्ट्रं शिथिलं स्यात् । तद् अनु विशो विशम् अनु यजमानो यजमानम् अनु प्रजा: । तं दृंहति देवी त्वा धिषणे निपातां ध्रुवे सदसि सीदेष ऊर्जे सीद इति । इमे वै देवी धिषणे इदं ध्रुवं सद: । - जैमिनीय ब्राह्मण १.८०
ॐयदि ध्रुव: प्रवर्तेत संलिख्य न्युब्ज्य यच् शुद्धं तेनाभ्युत्पूरयेत् । - जै.ब्रा. १.३५३
ॐ- - - -तं हेमं गृहपतिं हतम् अभित: कृपयमाणा निषेदु: । तम् उ ह ध्रुवगोप: सांकाशिनेनैव द्रवन्तं निजज्ञौ । - - - - जै.ब्रा. २.२६६
ॐचतुर्थ अह: – ध्रुवस्य सत: पर्यन्ति केतव इत्य् अहर् वै ध्रुवं छन्दांसि केतव: । - जै.ब्रा. ३.५८
ॐराजानाव् अनभिद्रुहा ध्रुवे सदस्य् उत्तमे । सहस्रस्थूण आसाते ।। इति सहस्ररूपं विराजाम् उपगच्छन्ति । वैराजं ह्य् एतद् अह: । - जै.ब्रा. ३.६३
ॐ- - - तस्यायमेव दक्षिण: पाणिर्जुहू:, सव्य उपभृत् कण्ठो ध्रुवा, अन्नं हवि:, प्राणा ज्योतींषि । - गोपथ ब्राह्मण १.३.१४
ॐस दिशो ऽन्वैक्षत प्राचीं दक्षिणां प्रतीचीमुदीचीं ध्रुवामूर्ध्वामिति । - - - -ध्रुवायाश्चोर्ध्वायाश्च पुराणवेदम् । स तान् पञ्च वेदानभ्यश्राम्यद् अभ्यतपत् समतपत् । तेभ्य: श्रान्तेभ्यस्तप्तेभ्य: संतप्तेभ्य: पञ्च महाव्याहृतीर्निरमिमीत - वृधत् करद् रुहन् महत् तदिति । - - - तदिति पुराणवेदात् । - गो.ब्रा. १.१.१०
ॐतस्य मकारश्रुत्येतिहासपुराणं - - - - त्रिणवत्रयस्त्रिंशौ स्तोमौ ध्रुवामूर्ध्वां दिशं हेमन्तशिशिरावृतू - - - गो.ब्रा. १.१.२१
ॐयोनिर्वा एषा दीक्षितस्य यद्दीक्षितविमितं योनिमेवैनं तत्स्वां प्रपादयन्ति । तस्माद्ध्रुवाद्योनेरास्ते च चरति च । तस्माद्ध्रुवाद्योनेर्गर्भा धीयन्ते च प्र च जायन्ते । - ऐतरेय ब्राह्मण १.३
ॐअथैनमस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाऽऽप्त्याश्च देवा: षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतीभी राज्याय तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजान: सवशोशीनराणां राज्यायैव तेऽभिषिच्यन्ते - ऐ.ब्रा. ८.१४
ॐअस्यां त्वा ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाऽऽप्त्याश्च देवा: षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय - - - ऐ.ब्रा. ८.१६
ॐसोमग्रहाभिधानं :– तां (पृश्निं) मनुष्या ध्रुवस्थाल्यायुरदुह्रन् । यद्ध्रुवस्थाली भवति । आयुरेव तया यजमान इमां दुहे । - तैत्तिरीय ब्राह्मण १.४.१.५
ॐनक्षत्रेष्टका : चक्षुष: शुक्रामन्थिनौ । आत्मन आग्रयणम् । अङ्गेभ्य उक्थ्यम् । आयुषो ध्रुवम् । प्रतिष्ठाया ऋतुपात्रे । - तै.ब्रा. १.५.४.२
ॐराजसूये राजाभिषेक विधि: समाववृत्रन्नधरागुदीचीरित्याह । राष्ट्रमेवास्मिन्ध्रुवमक: - तै.ब्रा. १.७.८.५
ॐपञ्च इन्द्राय : आ त्वाऽहार्षमन्तरभू: । ध्रुवस्तिष्ठाविचाचलि: । विशस्त्वा सर्वा वाञ्छन्तु । मा

त्वद्राष्ट्रमधिभ्रशत् । ध्रुवा द्यौर्ध्रुवा पृथिवी । ध्रुवं विश्वमिदं जगत् । ध्रुवा ह पर्वता इमे । ध्रुवो राजा विशामयम् । इहैवैधि मा व्यथिष्ठाः । पर्वत इवाविचाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठ । इह राष्ट्रमु धारय । - - - इन्द्र एणमदीधरत् । ध्रुवं ध्रुवेण हविषा । तस्मै देवा अधिब्रुवन् । अयं च ब्रह्मणस्पतिः । - तै.ब्रा. २.४.२.८
ॐदर्शपूर्णमासेष्टि विधिः :– ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरित्याह । ध्रुवा एवास्मिन्बह्वीः करोति । - तै.ब्रा. ३.२.१.५
ॐध्रुवमसि पृथिवीं दृꣳहेत्याह । पृथिवीमेवैतेन दृꣳहति । धर्त्रमस्यन्तरिक्षं दृꣳहेत्याह । अन्तरिक्षमेवैतेन दृꣳहति । धरुणमसि दिवं दृꣳहेत्याह । दिवमेवैतेन दृꣳहति । धर्माऽसि दिशो दृꣳहेत्या । दिश एवैतेन दृꣳहति । - तै.ब्रा. ३.२.७.२
ॐदर्शपूर्णमासेष्टि विधिः । स्त्रुक्संमार्जनविधिः :– स्त्रुचः संमार्ष्टि । स्त्रुवमग्रे । पुमाꣳसमेवाऽऽभ्यः सꣳश्यति मिथुनत्वाय । अथ जुहूम् । अथोपभृतम् । अथ ध्रुवाम् । असौ वै जुहूः । अन्तरिक्षमुपभृत् । पृथिवी ध्रुवा । - तै.ब्रा. ३.३.१.१
ॐस्त्रुग्ध्येषा । प्राणो वै स्त्रुवः । जुहूर्दक्षिणो हस्तः । उपभृत्सव्यः । आत्मा ध्रुवा । - तै.ब्रा. ३.३.१.५
ॐदर्शपूर्णमासे स्त्रुक्ष्वाज्यस्य ग्रहणसंबन्धि विधिः :– चतुर्ध्रुवायाम् । चतुष्पादः पशवः । - - - गौर्वै स्त्रुचः । चतुर्जुह्वां गृह्णाति । तस्माच्चतुष्पदी । अष्टावुपभृति । तस्मादष्टाशफा । चतुर्ध्रुवायाम् । तस्माच्चतुस्तना । - तै.ब्रा. ३.३.५.४
ॐअसौ वै जुहूः । अन्तरिक्षमुपभृत् । पृथिवी ध्रुवा । - तै.ब्रा. ३.३.६.११
ॐशिरो वा एतद्यज्ञस्य । यदाघारः । आत्मा ध्रुवा । आघारमाघार्य ध्रुवाꣳ समनक्ति । आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति । - तै.ब्रा. ३.३.७.११
ॐध्रुवाऽसीत्याह प्रतिष्ठित्यै । - तै.ब्रा. ३.३.९.५
ॐउपवेषोपविड्ढि नः । प्रजां पुष्टिमथो धनम् । द्विपदो नश्चतुष्पदः । ध्रुवाननपगान्कुर्विति पुरस्तात्प्रत्यञ्चमुपगूहति । तस्मात्पुरस्तात्प्रत्यञ्चः शूद्रा अवस्यन्ति । - तै.ब्रा. ३.३.१०.२
ॐअनूयाजानां मैत्रावरुणप्रैषा : देवीर्द्वारः संघाते विड्वीर्यामञ्छिथिरा ध्रुवा देवहूतौ वत्स ईमेनास्तरुण आमिमीयात् - तै.ब्रा. ३.६.१३.१
ॐसाद्यमानाया ध्रुवाया अनुमन्त्रणे मन्त्रम् : यो मा वाचा मनसा दुर्मरायुः । हृदाऽरातीयादभिदासदग्ने । इदमस्य चित्तमधरं ध्रुवायाः । अहमुत्तरो भूयासम् । अधरे मत्सपत्नाः । - तै.ब्रा. ३.७.६.६
ॐसावित्रचयनाभिधानम् । दक्षिणादिदिक्षु स्वयमातृण्णानामुपधानार्थं मन्त्राः :– भुवो वायुं चान्तरिक्षं च मां च । त्रीꣳश्च लोकान्त्संवत्सरं च । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । स्वरादित्यं च दिवं च मां च । त्रीꣳश्च लोकान्तसंवत्सरं च । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । भूर्भुवः स्वश्चन्द्रमसं च दिशश्च मां च । त्रीꣳश्च लोकान्त्संवत्सरं च । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । - तै.ब्रा. ३.१०.२.१
ॐसावित्रचयनाभिधानम् : इन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः । महान्त्सधस्थे ध्रुव आनिषत्तः । नमस्ते अस्तु मा मा हिꣳसीः । - तै.ब्रा. ३.१०.४.३
ॐनाचिकेत इष्टकाः :– - -विश्वं यज्ञं विश्वं भूतं विश्वꣳ सुभूतम् । - - - -तं त्वोपदधे कामदुघमक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । - - - - तै.ब्रा. ३.११.१.१
ॐतपोऽसि लोके श्रितम् । तेजसः प्रतिष्ठा । - - - -तया देवतया - -- तै.ब्रा. ३.११.१.२

ॐतेजोऽसि तपसि श्रितम् । समुद्रस्य प्रतिष्ठा । - - - तया देवतया - - -
समुद्रोऽसि तेजसि श्रितः । अपां प्रतिष्ठा । - - - तया देवतया - - -
आपः स्थ समुद्रे श्रिताः । पृथिव्याः प्रतिष्ठा युष्मासु । - - -तया देवतया - - -
पृथिव्यस्यप्सु श्रिता । अग्नेः प्रतिष्ठा । - - - तया देवतया - - -
अग्निरसि पृथिव्याꣳ श्रितः । अन्तरिक्षस्य प्रतिष्ठा । - - - तया देवतया - - -
अन्तरिक्षमस्यग्नौ श्रितम् । वायोः प्रतिष्ठा । - - -तया देवतया - - - -
वायुरस्यन्तरिक्षे श्रितः । दिवः प्रतिष्ठा । - - - तया देवतया - - - -
द्यौरसि वायौ श्रिता । आदित्यस्य प्रतिष्ठा । - - - तया देवतया - - - -
आदित्योऽसि दिवि श्रितः । चन्द्रमसः प्रतिष्ठा । - - - तया देवतया - - -
चन्द्रमा अस्यादित्ये श्रितः । नक्षत्राणां प्रतिष्ठा । - - - तया देवतया - - -
नक्षत्राणि स्थ चन्द्रमसि श्रितानि । संवत्सरस्य प्रतिष्ठा युष्मासु । - - - तया देवतया - - - -
संवत्सरोऽसि नक्षत्रेषु श्रितः । ऋतूनां प्रतिष्ठा । - - - तया देवतया - - -
ऋतवः स्थ संवत्सरे श्रिताः । मासानां प्रतिष्ठा युष्मासु । - - तया देवतया - - -
मासाः स्थर्तुषु श्रिताः । अर्धमासानां प्रतिष्ठा युष्मासु । - - - तया देवतया - - -
अर्धमासाः स्थ माःसु श्रिताः । अहोरात्रयोः प्रतिष्ठा युष्मासु । - - - तया देवतया - - -
अहोरात्रे स्थोऽर्धमासेषु श्रिते । भूतस्य प्रतिष्ठे भव्यस्य प्रतिष्ठे । - - तया देवतया - - - -
पौर्णमास्यष्टकाऽमावास्या । अन्नादाः स्थान्नदुघो युष्मासु - - - तया देवतया - - -
राडसि बृहती श्रीरसीन्द्रपत्नी धर्मपत्नी । विश्वं भूतमनुप्रभूता । - - - तया देवतया - - -
ओजोऽसि सहोऽसि । बलमसि भ्राजोऽसि । देवानां धामामृतम् । - - - तया देवतया -- - - - तै.ब्रा. ३.११.१.२-२१
ॐलोकम्पृणा इष्टका : ता अस्य सूददोहसः । सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशः । त्रिष्वारोचने दिवः । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । - तै.ब्रा. ३.११.६.२
ॐवैश्वसृजचयनम् । उत्तम लेखायाम् उपधानार्थ मन्त्राः :– यच्चामृतं यच्च मर्त्यम् । यच्च प्राणिति यच्च न । सर्वास्ता इष्टकाः कृत्वा । उप कामदुघा दधे । तेनर्षिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद । - तै.ब्रा. ३.१२.६.१
ॐसर्वाः स्त्रियः सर्वान्पुꣳसः । सर्वं न स्त्रीपुमं च यत् । सर्वास्ताः - - - -
यावन्तः पाꣳसवो भूमेः । संख्याता देवमायया । सर्वास्ताः - - - -
यावन्त ऊषाः पशूनाम् । पृथिव्यां पुष्टिर्हिताः । सर्वास्ताः - - - - -
यावतीः सिकताः सर्वाः । अप्स्वन्तश्च याः श्रिताः । सर्वास्ताः - - - -
यावतीः शर्करा धृत्यै । अस्यां पृथिव्यामधि । सर्वास्ताः - - - - - -
यावन्तोऽश्मानोऽस्यां पृथिव्याम् । प्रतिष्ठासु प्रतिष्ठिताः । सर्वास्ताः - - - - -
यावतीर्वीरुधः सर्वाः । विष्ठिताः पृथिवीमनु । सर्वास्ताः - - - -
यावतीरोषधीः सर्वाः । विष्ठिताः पृथिवीमनु । सर्वास्ताः - - - -
यावन्तो वनस्पतयः । अस्यां पृथिव्यामधि । सर्वास्ताः - - - -
यावन्तो ग्राम्या पशवः सर्वे । आरण्याश्च ये । सर्वास्ताः - - - -
ये द्विपादश्चतुष्पादः । अपाद उदरसर्पिणः । सर्वास्ताः - - - - ।
यावदाञ्जनमुच्यते । देवत्रा यच्च मानुषम् । सर्वास्ताः - - - -

यावत्कृष्णायसꣳ सर्वम् । देवत्रा यच्च मानुषम् । सर्वास्ता: - - - -
यावल्लोहायसꣳ सर्वम् । देवत्रा यच्च मानुषम् । सर्वास्ता: - - - -
सर्वꣳ सीसꣳ सर्वं त्रपु देवत्रा यच्च मानुषम् । सर्वास्ता: - - - - -
सर्वꣳ हिरण्यꣳ रजतम् । देवत्रा यच्च मानुषम् । सर्वास्ता: - - - - -
सर्वꣳ सुवर्णꣳ हरितम् । देवत्रा यच्च मानुषम् । सर्वास्ता इष्टका: कृत्वा । उप कामदुघा दधे । तेनर्षिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद । - तै.ब्रा. ३.१२.६.१-४
ॐमध्यम लेखायामुपधानार्था मन्त्रा: :– सर्वा दिशो दिक्षु । यच्चान्तर्भूतं प्रतिष्ठितम् । सर्वास्ता इष्टका: कृत्वा । उप कामदुघा दधे । तेनर्षिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ।
अन्तरिक्षं च केवलम् । यच्चास्मिन्नन्तराहितम् । सर्वास्ता: - - - -
आन्तरिक्ष्यश्च या: प्रजा: । गन्धर्वाप्सरसश्च ये । सर्वास्ता: - - - -
सर्वानुदारान्त्सलिलान् । अन्तरिक्षे प्रतिष्ठितान् । सर्वास्ता - - - -
सर्वानुदारान्त्सलिलान् । स्थावरा: प्रोष्याश्च ये । सर्वास्ता: - - - -
सर्वां धुनिꣳ सर्वान्ध्वꣳसान् । हिमो यच्च शीयते । सर्वास्ता: - - - - -
सर्वान्मरीचीन्वितातान् । नीहारो यच्च शीयते । सर्वास्ता: - - - - -
सर्वा विद्युत: सर्वान्त्स्तनयित्नून् । ह्रादुनीर्यच्च शीयते । सर्वास्ता: - - - -
सर्वा: स्रवन्ती: सरित: । सर्वमप्सुचरं च यत् । सर्वास्ता: - - - -
याश्च कूप्या याश्च नाद्या: समुद्रिया: । याश्च वैशन्तीरुत प्रासचीर्या: । सर्वास्ता: - - - -
ये चोत्तिष्ठन्ति जीमूता: । याश्च वर्षन्ति वृष्टय: । सर्वास्ता: - - - -
तपस्तेज आकाशम् । यच्चाऽऽकाशे प्रतिष्ठितम् । सर्वास्ता: - - - - -
वायुं वयाꣳसि सर्वाणि । अन्तरिक्षचरं च यत् । सर्वास्ता: - - - - -
अग्निꣳ सूर्यं चन्द्रम् । मित्रं वरुणं भगम् । सर्वास्ता: - - - -
सत्यꣳ श्रद्धां तपो दमम् । नाम रूपं च भूतानाम् । सर्वास्ता: इष्टका: कृत्वा । उप कामदुघा दधे । तेनर्षिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद । - तै.ब्रा. ३.१२.७.१-५
ॐअभ्यन्तरलेखायामुपधान मन्त्रा: :– सर्वान्दिवꣳ सर्वान्देवान्दिवि । यच्चान्तर्भूतं प्रतिष्ठितम् । सर्वास्ता इष्टका: कृत्वा । उप कामदुघा दधे । तेनर्षिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ।
यावतीस्तारका: सर्वा: । वितता रोचने दिवि । सर्वास्ता: - - - - -
ऋचो यजूꣳषि सामानि । अथर्वाङ्गिरसश्च ये । सर्वास्ता: - - - -
इतिहासपुराणं च । सर्पदेवजनाश्च ये । सर्वास्ता: - -- - -
ये च लोका ये चालोका: । अन्तर्भूतं प्रतिष्ठितम् । सर्वास्ता: - - -
यच्च ब्रह्म यच्चाब्रह्म । अन्तर्ब्रह्मन्प्रतिष्ठितम् । सर्वास्ता: - - - - -
अहोरात्राणि सर्वाणि । अर्धमासाꣳश्च केवलान् । सर्वास्ता: - - - - -
सर्वानृतूनत्सर्वान्मासान् । संवत्सरं च केवलम् । सर्वास्ता: - - - - -
सर्वं भूतꣳ सर्वं भव्यम् । यच्चातोऽधिभविष्यति । सर्वास्ता इष्टका: कृत्वा । उप कामदुघा दधे । तेनर्षिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद । - तै.ब्रा. ३.१२.८.१-३
ॐदक्षिणा काले ब्रह्मणा पठनीया मन्त्रा: :– ऊर्ग्राजानमुदवहत् । ध्रुवगोप: सहोऽभवत् । ओजोऽभ्यष्टौद्ग्राव्ण: । यद्विश्वसृज आसत । - तै.ब्रा. ३.१२.९.५
ॐतयोरिद् घृतवत् पयो विप्रा रिहन्ति धीतिभि: । गन्धर्वस्य ध्रुवे पदे ।। - ऋ. १.२२.१४

ॐमन्द्रो होता गृहपतिरग्ने दूतो विशामसि । त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ।। - ऋ. १.३६.५
ॐहिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो३ न पर्वतान् । मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ।। - ऋ. १.६४.११
ॐतं त्वा नरो दम आ नित्यमिद्धमग्ने सचन्त क्षितिषु ध्रुवासु । अधि द्युम्नं नि दधुर्भूर्यस्मिन् भवा विश्वायुर्धरुणो रयीणाम् ।। - ऋ. १.७४.४
ॐआ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि । या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ।। - ऋ. १.५९.३
ॐको अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः । कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः ।। - ऋ. १.८४.१८
ॐत्रिमूर्धानं सप्तरश्मिं गृणीषे ऽनूनमग्निं पित्रोरुपस्थे । निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ।। - ऋ. १.१४६.१
ॐअनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् । जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ।। - ऋ. १.१६४.३०
ॐपान्ति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान् । उत च्यवन्ते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः ।। - ऋ. १.१६७.८
ॐसाकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि । विद्वां अस्य व्रता ध्रुवा वया इवानु रोहते ।। - ऋ. २.५.४
ॐराजानावनभिद्रुहा ध्रुवे सदस्युत्तमे । सहस्त्रस्थूण आसाते ।। - ऋ. २.४१.५
ॐमहान् त्सधस्थे ध्रुव आ निषत्तो ऽन्तर्द्यावा माहिने हर्यमाणः । आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ।। - ऋ. ३.६.४
ॐयदद्य त्वा प्रयति यज्ञे अस्मिन् होतश्चिकित्वोऽवृणीमहीह । ध्रुवमया ध्रुवमुताशमिष्ठाः प्रजानन् विद्वां उप याहि सोमम् ।। - ऋ. ३.२९.१६
ॐसमान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके । उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम ।। विश्वेदेते जनिमा सं विविक्तो महो देवान् बिभ्रती न व्यथेते । एजद् ध्रुवं पत्यते विश्वमेकं चरत् पतत्रि विषुणं वि जातम् ।। - ऋ. ३.५४.७-८
ॐशृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः । आदित्यैर्नो अदितिः शृणोतु यच्छन्तु नो मरुतः शर्म भद्रम् ।। - ऋ. ३.५४.२०
ॐन ता मिनन्ति मायिनो न धीरा व्रता देवानां प्रथमा ध्रुवाणि । न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः ।। - ऋ. ३.५६.१
ॐयस्ते भरादन्नियते चिदन्नं निशिषन्मन्द्रमतिथिमुदीरत् । आ देवयुरिनधते दुरोणे तस्मिन् रयिर्ध्रुवो अस्तु दास्वान् ।। - ऋ. ४.२.७
ॐप्र तां अग्निर्बभसत् तिग्मजम्भस्तपिष्ठेन शोचिषा यः सुराधाः । प्र ये मिनन्ति वरुणस्य धाम प्रिया मित्रस्य चेततो ध्रुवाणि ।। - ऋ. ४.५.४
ॐयं सीमकृण्वन् तमसे विपृचे ध्रुवक्षेमा अनवस्यन्तो अर्थम् । तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहन्ति ।। - ऋ. ४.१३.३
ॐऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्यश्वान् । दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं

वपुषामपश्यम् ।। - ऋ. ५.६२.१
ॐया धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य । न वां देवा अमृता आ मिनन्ति व्रतानि मित्रावरुणा ध्रुवाणि ।। - ऋ. ५.६६.४
ॐव्रतेन स्थो ध्रुवक्षेमा धर्मणा यातुयज्जना । नि बर्हिषि सदतं सोमपीतये ।। - ऋ. ५.७२.२
ॐअयं होता प्रथमः पश्यतेममिदं ज्योतिरमृत मर्त्येषु । अयं स जज्ञे ध्रुव आ निषत्तो ऽमर्त्यस्तन्वा३ वर्धमानः ।। - ऋ. ६.९.४
ॐध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः । विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु ।। - ऋ. ६.९.५
ॐसमिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् । विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ।। - ऋ. ६.१५.७
ॐअवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः । अवन्तु मा पर्वतासो ध्रुवासो ऽवन्तु मा पितरो देवहूतौ ।। - ऋ. ६.५२.४
ॐआ विश्ववाराश्विना गतं नः प्र तत् स्थानमवाचि वां पृथिव्याम् । अश्वो न वाजी शुनपृष्ठो अस्थादा यत् सेदथुर्ध्रुवसे न योनिम् ।। - ऋ. ७.७०.१
ॐशं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु । शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ।। - ऋ. ७.३५.८
ॐअधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः । ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या ।। - ऋ. ७.७४.५
ॐमहे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत् स्वम् । अजामिमन्यः श्नथयन्तमातिरद् दभ्रेभिरन्यः प्र वृणोति भूयसः ।। - ऋ. ७.८२.६
ॐध्रुवासु त्वासु क्षितिषु क्षियन्तो व्यस्मत् पाशं वरुणो मुमोचत् । अवो वन्वाना अदितेरुपस्थाद् यूयं पात स्वस्तिभिः सदा नः ।। - ऋ. ७.८८.७
ॐवि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ।। - ऋ. ७.१००.४
ॐवास्तोष्पते ध्रुवा स्थूणांऽसत्रं सोम्यानाम् । द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा ।। - ऋ. ८.१७.१४
ॐयस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः । त्रिरुत्तराणि पप्रतुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभन्तामन्यके समे ।। - ऋ. ८.४१.९
ॐअभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् । इषं स्तोतृभ्य आ भर ।। - ऋ. ९.२०.४
ॐआ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः । ध्रुवे सदसि सीदति ।। - ऋ. ९.४०.२
ॐउभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः । यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ।। - ऋ. ९.८६.६
ॐएते पूता विपश्चितः सोमासो दध्याशिरः । सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ।। - ऋ. ९.१०१.१२
ॐजज्ञानं सप्त मातरो वेधामशासत श्रिये । अयं ध्रुवो रयीणां चिकेत यत् ।। - ऋ. ९.१०२.४
ॐऋतायिनी मायिनी सं दधाते मित्वा शिशुं जज्ञतुर्वर्धयन्ती । विश्वस्य नाभिं चरतो ध्रुवस्य कवेश्चित् तन्तुं मनसा वियन्तः ।। - ऋ. १०.५.३

ॐध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युञ्जते । अजुर्यासो हरिषाचो हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः ।। - ऋ. १०.६४.१२
ॐआ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ।।
इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ।।
इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा । तस्मै सोमो अधि ब्रवत् तस्मा उ ब्रह्मणस्पतिः ।।
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ।।
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।।
ध्रुवं ध्रुवेण हविषा ऽभि सोमं मृशामसि । अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत् ।। - ऋ. १०.१७३.१-६
ॐ- - - अद्भ्यो वा इदꣳ समभूत् । तस्मादिदꣳ सर्वं ब्रह्म स्वयंभ्विति । तस्मादिदꣳ सर्वꣳ शिथिलमिवाध्रुवमिवाभवत् - तैत्तिरीय आरण्यक १.२३.८
ॐतस्यानशनं दीक्षा स्थानमुपसद आसनꣳ सुत्या वाग्जुहूर्मन उपभृत् धृतिर्ध्रुवा प्राणो हविः - - - तै.आ. २.१७.१
ॐध्रुवस्त्वमसि ध्रुवस्य क्षितमसि त्वं भूतानामधिपतिरसि - - - सर्वं ते नमो नमः शिशुकुमाराय नमः - तै.आ. २.१९.१
ॐमहावीर संस्काराः - वृष्णो अश्वस्य निष्पदसि । वरुणस्त्वा धृतव्रत आधूपयतु । मित्रावरुणयोर्ध्रुवेण धर्मणा - तै.आ. ४.२१
ॐमहावीर : अपद्यमानः पृथिव्याम् । आशा दिश आपृण । उत्तिष्ठ बृहन्भव । ऊर्ध्वस्तिष्ठ ध्रुवस्त्वम् । - तै.आ. ४.३.२
ॐप्रवर्ग्य : चिदसि समुद्रयोनिः । इन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः । महान्त्सधस्थे ध्रुव आनिषत्तः । नमस्ते अस्तु मा मा हिꣳसीः । - तै.आ. ४.११.६
ॐघर्मेष्टका : घर्मः शिरस्तदयमग्निः । पुरीषमसि सं प्रियं प्रजया पशुभिर्भुवत् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । - तै.आ. ४.१७.१
ॐअग्निविमर्शनम् : प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद् ध्रुवः सीद । - तै.आ. ४.१९.१
ॐउत्तिष्ठ बृहन्भवोर्ध्वस्तिष्ठ ध्रुवस्त्वमित्याह प्रतिष्ठित्यै । - तै.आ. ५.२.७
ॐवैश्वदेवकर्मणि विनियुक्ताः षड्ढोममन्त्राः - अग्नये स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा । ध्रुवाय भूमाय स्वाहा । ध्रुवक्षितये स्वाहा । अच्युतक्षितये स्वाहा । अग्नये स्विष्टकृते स्वाहा । - तै.आ. परिशिष्ट ६७
सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम् । संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ ।। - अ. २.२६.४
ॐइहैव ध्रुवां नि मिनोमि शालां क्षेमे तिष्ठाति घृतमुक्षमाणा । तां त्वा शाले सर्ववीराः सुवीरा अरिष्टवीरा उप सं चरेम ।। इहैव ध्रुवा प्रति तिष्ठ शालेऽश्वावती गोमती सूनृतावती । ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय ।। धरुण्यसि शाले - - - अ. ३.१२.१-२
ॐये३स्यां स्थ ध्रुवायां दिशि निलिम्पा नाम देवास्तेषां व ओषधीरिषवः । ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ।। - अथर्ववेद ३.२६.५
ॐध्रुवा दिग् विष्णुरधिपतिः कल्माषग्रीवो रक्षिता वीरुध इषवः । तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु । यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ।। - अ. ३.२७.५
ॐऊर्ध्वायां दिश्य१जस्यानूकं धेहि दिशि ध्रुवायां धेहि पाजस्यमन्तरिक्षे मध्यतो मध्यमस्य । - अ. ४.१४.८

ॐअश्मवर्म मेऽसि यो मा ध्रुवाया दिशोऽघायुरभिदासात् । एतत् स ऋच्छात् - अ. ५.१०.५
ॐआ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत् । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद् राष्ट्रमधि भ्रशत् । इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलत् । इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ।। इन्द्र एतमदीधरद् ध्रुवं ध्रुवेण हविषा । तस्मै सोमो अधि ब्रवदयं च ब्रह्मणस्पतिः ।। - अ. ६.८७.१-३
ॐध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् । ध्रुवासः पर्वता इमे ध्रुवो राजा विशामयम् ।। ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।। ध्रुवोऽच्युतः प्र मृणीहि शत्रून्छत्रूयतोऽधरान् पादयस्व । सर्वा दिशः संमनसः सध्रीचीर्ध्रुवाय ते समितिः कल्पतामिह ।। - अ. ६.८८.१-३
ॐध्रुवं ध्रुवेण हविषाव सोमं नयामसि । यथा न इन्द्रः केवलीर्विशः संमनसस्करत् ।। - अ. ७.९९.१/७.९४.१
ॐयदद्य त्वा प्रयति यज्ञे अस्मिन् होतश्चित्वन्नवृणीमहीह । ध्रुवमयो ध्रुवमुता शविष्ठ प्रविद्वान् यज्ञमुप याहि सोमम् ।। - अ. ७.१०२.१/७.९७.१
ॐअग्नेर्घासो अपां गर्भो या रोहन्ति पुनर्णवाः । ध्रुवाः सहस्रनाम्नीर्भेषजीः सन्त्वाभृताः ।। - अ. ८.७.८
ॐध्रुवाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः । - अ. ९.३.२९
ॐअनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् । जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ।। - अ. ९.१४.८/९.१०.८
ॐबभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् । अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम् ।। - अ. १२.१.११
ॐविश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम् । शिवां स्योनामनु चरेम विश्वहा ।। - अ. १२.१.१७
ॐजनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम् । सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती ।। - अ. १२.१.४५
ॐध्रुवेयं विराण्नमो अस्त्वस्यै शिवा पुत्रेभ्य उत मह्यमस्तु । सा नो देव्यदिते विश्ववार इर्य इव गोपा अभि रक्ष पक्वम् ।। - अ. १२.३.११
ॐध्रुवायै त्वा दिशे विष्णवेऽधिपतये कल्माषग्रीवाय रक्षित्र ओषधीभ्य इषुमतीभ्यः । एतं परि दद्मस्तं नो गोपायतास्माकमैतोः । दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्ये परि णो ददात्वथ पक्वेन सह सं भवेम ।। - अ. १२.३.५९
ॐस्योनं ध्रुवं प्रजायै धारयामि तेऽश्मानं देव्याः पृथिव्या उपस्थे । तमा तिष्ठानुमाद्या सुवर्चा दीर्घं त आयुः सविता कृणोतु ।। - अ. १४.१.४७
ॐतस्मै ध्रुवाया दिशः । हैमनौ मासौ गोप्तारावकुर्वन् भूमिं चाग्निं चानुष्ठातारौ । हैमनावेनं मासौ ध्रुवाया दिशो गोपायतो भूमिश्चाग्निश्चानु तिष्ठतो य एवं वेद ।। - अ. १५.४.१३
ॐस ध्रुवां दिशमनु व्यचलत् । तं भूमिश्चाग्निश्चौषधयश्च वनस्पतयश्च वानस्पत्याश्च वीरुधश्चानुव्यचलन् । - अ. १५.६.१
ॐस यद् ध्रुवां दिशमनु व्यचलद् विष्णुभूर्त्वानुव्यचलद् विराजमन्नादीं कृत्वा । विराजान्नाद्यान्नमत्ति य एवं वेद । - अ. १५.१४.१०
ॐअग्निर्मा गोप्ता परि पातु विश्वत उद्यन्त्सूर्यो नुदतां मृत्युपाशान् । व्युच्छन्तीरुषसः पर्वता ध्रुवाः सहस्रं

प्राणा मय्या यतन्ताम् ।। - अ. १७.१.३०
ॐध्रुवायां त्वा दिशि पुरा संवृत: स्वधायामा दधा बाहुच्युता पृथिवी द्यामिवोपरि । लोककृत: पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।। - अ. १८.३.३४
ॐजुहूर्दाधार द्यामुपभृदन्तरिक्षं ध्रुवा दाधार पृथिवीं प्रतिष्ठाम् । प्रतीमां लोका घृतपृष्ठा: स्वर्गा: कामंकामं यजमानाय दुह्राम् । ध्रुव आ रोह पृथिवीं विश्वभोजसमन्तरिक्षमुपभृदा क्रमस्व । जुहु द्यां गच्छ यजमानेन साकं स्त्रुवेण वत्सेन दिश: प्रपीना: सर्वा धुक्ष्वाहृणीयमान: ।। - अ. १८.४.५-६
ॐशं न: सूर्य उरुचक्षा उदेतु शं नो भवन्तु प्रदिशश्चतस्त्र: । शं न: पर्वता ध्रुवयो भवन्तु शं न: सिन्धव: शमु सन्त्वाप: ।। - अ. १६.१०.८
ॐप्रजापतिर्मा प्रजननवान्त्सह प्रतिष्ठाया ध्रुवाया दिश: पातु तस्मिन् क्रमे तस्मिंछ्ये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ।। - अ. १६.१७.६
ॐप्रजापतिं ते प्रजननवन्तमृच्छन्तु । ये माघायवो ध्रुवायां दिशोऽभिदासात् ।। - अ. १६.१८.६
ॐचतुर्वीरं बध्यत आञ्जनं ते सर्वा दिशो अभयास्ते भवन्तु । ध्रुवस्तिष्ठासि सवितेव चार्य इमा विशो अभि हरन्तु ते बलिम् ।। - अ. १६.४५.४
ॐकपालोपधानादि : स उपदधाति - ध्रुवमसि पृथिवीं दꣳह इति । पृथिव्या एव रूपैणैतदेव दृंहति । एतेनैव द्विषन्तं भ्रातृव्यमवबाधते - शतपथ ब्राह्मण १.२.१.७
ॐतस्येयमेव जुहू:, इयमुपभृत्, आत्मैव ध्रुवा । तद्वा आत्मन एवेमानि सर्वाण्यङ्गानि प्रभवन्ति । तस्मादु ध्रुवाया एव सर्वो यज्ञ: प्रभवति । - श.ब्रा. १.३.२.२
ॐतस्यासावेव द्यौर्जुहू:, अथेदमन्तरिक्षमुपभृत्, इयमेव ध्रुवा । तद्वा अस्या एवेमे सर्वे लोका: प्रभवन्ति । तस्मादु ध्रुवाया एव सर्वो यज्ञ: प्रभवति । - श.ब्रा. १.३.२.४
ॐअथ यच्चतुर्ध्रुवायां गृह्णाति - सर्वस्मै तद् यज्ञाय गृह्णाति । तत्तदनादिश्य - आज्यस्यैव रूपेण गृह्णाति । - श.ब्रा. १.३.२.१०
ॐअथ यच्चतुर्ध्रुवायां गृह्णाति अनुष्टुभे तद् गृह्णाति । वाग् वा अनुष्टुप् । वाचो वा इदं सर्वं प्रभवति । तस्मादु ध्रुवाया एव सर्वो यज्ञ: प्रभवति । इयं वा अनुष्टुप् अस्यै वा इदं सर्वं प्रभवति । तस्मादु ध्रुवाया एव सर्वो यज्ञ: प्रभवति । - श.ब्रा. १.३.२.१६
ॐअथोत्तरं परिदधाति - मित्रावरुणौ त्वोत्तरत: परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित: इति । - श.ब्रा. १.३.४.४
ॐघृताच्यसि ध्रुवा नाम्ना । इति ध्रुवाम् । घृताची हि, ध्रुवा हि नाम्ना । सेदं प्रियेण धाम्ना प्रियꣳ सद आसीद इति - यदन्यद्धवि: । - श.ब्रा. १.३.४.१४
ॐसोऽभिमृशति - ध्रुवा असदन् इति । ध्रुवा ह्यसदन् । ऋतस्य योनौ इति । यज्ञो वा ऋतस्य योनि:, यज्ञे ह्यसदन् । - श.ब्रा. १.३.४.१६
ॐउत्तराघार: :– शिरो वै यज्ञस्योत्तर आघार: । आत्मा वै ध्रुवा । तदात्मन्येवैतच्छिर: प्रतिदधाति । - श.ब्रा. १.४.५.५
ॐयजमान एव ध्रुवामनु । योऽस्मा अरातीयति स उपभृतमनु । स यद्धोपभृता समञ्ज्याद् - यो यजमानायारातीयति । तस्मिञ्छ्रियं दध्यात्, तद्यजमान एवैतच्छ्रियं दधाति, तस्माद् ध्रुवया समनक्ति । स समनक्ति । संज्योतिषा ज्योति: इति । - - श.ब्रा. १.४.५.५
ॐसान्नाय्यसंपादनं :– ध्रुवा अस्मिन् गोपतौ स्यात बह्वी: इति । अनपक्रमिण्योऽस्मिन् यजमाने बह्व्य: स्यात् - इत्येवैतदाह - श.ब्रा. १.७.१.७

ॐस समवदायेडाम्, पूर्वार्द्धं पुरोडाशस्य प्रशीर्य, पुरस्ताद् ध्रुवायै निदधाति, तां होत्रे प्रदाय दक्षिणात्येति ।----श.ब्रा. १.८.१.१३
ॐअथ यत्पूर्वार्द्धं पुरोडाशस्य प्रशीर्य पुरस्ताद् ध्रुवायै निदधाति - यजमानो वै ध्रुवा, तद्यजमानस्य प्राशितं भवति ।-श.ब्रा. १.८.१.३६
ॐसूक्तवाक् - शंयुवाक् कर्मारम्भः :- स वा अग्रं जुह्वामनक्ति, मध्यमुपभृति, मूलं ध्रुवायाम् । अग्रमिव हि जुहूः, मध्यमिवोपभृत्, मूलमिव ध्रुवा ।-श.ब्रा. १.८.३.१३
ॐतद्धोचुः - हन्तेमां प्रतिष्ठां दृंहामहै, तस्यां ध्रुवायामशिथिलायामग्नी आदधामहै, ततोऽस्यै सपत्नान् निर्भक्ष्याम इति । तद्यथा शङ्कुभिश्चर्म विहन्यात्, एवमिमां प्रतिष्ठां शर्कराभिः पर्यबृंहन्त । सेयं ध्रुवाऽशिथिला प्रतिष्ठा । तस्यां ध्रुवायामशिथिलायामग्नी आदधत ।------श.ब्रा. २.१.१.६
ॐस तत्र जुहूमासादयति । अथ पूर्वामुपभृतम् , अथ ध्रुवाम् , अथ पुरोडाशम् , अथ धानाः, अथ मन्थमासाद्य हवींषि संमृशति - श.ब्रा. २.६.१.१७
ॐअथ यद् ध्रुवायामाज्यं परिशिष्टं भवति - तज्जुह्वामानयति । त्रिः स्रुवेणाज्यविलापन्या अधिजुह्वां गृह्णाति ।-श.ब्रा. ३.१.४.१७
ॐअथ यद् ध्रुवायामाज्यं परिशिष्टं भवति - तत् जुह्वां चतुष्कृत्वो विगृह्णाति ।-श.ब्रा. ३.२.४.८
ॐअथ परिधीन् परिदधाति - ध्रुवोऽसि पृथिवीं दृंह इति मध्यमम् । ध्रुवक्षिदस्यन्तरिक्षं दृंह इति दक्षिणम् । अच्युतक्षिदसि दिवं दृंह इति उत्तरम् ।-श.ब्रा. ३.५.२.१४
ॐहविर्धानम् : अथ ग्रन्थिं करोति । विष्णोर्ध्रुवोऽसि इति । नेद् व्यवपद्याताऽइति । तं प्रकृते कर्मन् विष्यति । तथो हाध्वर्युं वा यजमानं वा ग्राहो न विन्दति ।-श.ब्रा. ३.५.३.२५
ॐऔदुम्बरी : अथ मिनोति - द्युतानस्त्वा मारुतो मिनोतु इति । यो वाऽअयं पवते - एष द्युतानो मारुतः । तदेनामेतेन मिनोति - मित्रावरुणौ ध्रुवेण धर्मणा इति । प्राणोदानौ वै मित्रावरुणौ । - श.ब्रा. ३.६.१.१६
ॐअथैवमभिपद्य वाचयति - ध्रुवाऽसिध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया भूयात् इति । पशुभिः इति । वा एवं यं कामं कामयते - सोऽस्मै कामः समृद्ध्यते ।-श.ब्रा. ३.६.१.२०
ॐसदः- अथ ग्रन्थिं करोति - इन्द्रस्य ध्रुवोऽसि इति । नेद्व्यवपद्याताऽइति प्रकृते कर्मन् विष्यति । तथो हाध्वर्युं वा यजमानं वा ग्राहो न विन्दति ।-श.ब्रा. ३.६.१.२५
ॐसंज्ञपनान्तरभाविप्रयोगकथनम् : उत्तमो वाऽएष प्रयाजो भवति । इदं वै हविर्यज्ञ उत्तमे प्रयाजे ध्रुवामेवाग्रेऽभिघारयति । तस्यै हि प्रथमावाज्यभागौ होष्यन् भवति ।-श.ब्रा. ३.८.२.२५
ॐउक्थ ग्रहः :- तस्यासावेव ध्रुव आयुरात्मैव । अस्यैतेन संहितः, पर्वाणि संततानि । तद्वाऽअगृहीत एवैतस्मादच्छावाकायोत्तमो ग्रहो भवति ।-श.ब्रा. ४.२.३.३
ॐध्रुवग्रहः :- अथ ह वाऽअस्यैष प्राणः - योऽयं पुरस्ताद् । स वै वैश्वानर एव । अथ योऽयं पश्चात्स ध्रुवः । तौ ह स्मैतौ द्वावेवाग्रे ग्रहौ गृह्णन्ति - ध्रुववैश्वानराविति । तयोरयमप्येतर्ह्यन्यतर एव गृह्यते - ध्रुव एव ।-श.ब्रा. ४.२.४.१
ॐयद्वाऽअस्यावाचीनं नाभेः - तदस्यैष आत्मनः । स यत्पुरैतस्य होमात्सर्पेद्वा, प्र वा स्रावयेत - ध्रुवं हावमेहेत् - नेद्ध्रुवमवमेहानीति । तस्माद्वाऽअग्निष्टोमसद्भवति ।-श.ब्रा. ४.२.४.८
ॐतस्माद् - यदनेन मुखेन नानारूपमशनमश्नाति - अथैतेन प्राणेनैकरूपमेव प्रस्त्रावयते - अप इवैव । अथ यस्माद् ध्रुवो नाम ।----तदुत्तरमेव हविर्धानं दक्षिणं हविर्धानमदृंहत् । तद्यदेतं न शेकुरुद्धन्तुम् - तस्मात् ध्रुवो नाम ।-श.ब्रा. ४.२.४.१८

ॐवत्सो वाऽएष एतस्यै गायत्र्यै । यज्ञो वै गायत्री । द्वादश स्तोत्राणि, द्वादश शस्त्राणि - तच्चतुर्विंशतिः । चतुर्विंशत्यक्षरा वै गायत्री । - श.ब्रा. ४.२.४.२१
ॐसोऽवनयति - ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि इति । - श.ब्रा. ४.२.४.२३
ॐअथातो गृह्णात्येव - मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् । कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमः, एष ते योनिर्वैश्वानराय त्वा इति सादयति । - श.ब्रा. ४.२.४.२४
ॐअथैतान् पञ्च वाजपेयग्रहान्गृह्णाति - ध्रुवसदं त्वा नृषदं मनःसदम्, उपयामगृहीतोऽसि, इन्द्राय त्वा जुष्टं गृह्णामि, एष ते योनिः, इन्द्राय त्वा जुष्टतमम् इति सादयति । एषां वै लोकानामयमेव ध्रुवः - इयं पृथिवी इममेवैतेन लोकमुज्जयति - श.ब्रा. ५.१.२.४
ॐअथोक्थ्यं गृह्णाति । अथ ध्रुवम् । अथैतान्त्सोमग्रहान् उत्तमे स्तोत्रऽऋत्विजां चमसेषु व्यवनीय जुह्वति । - श.ब्रा. ५.१.२.१६
ॐयूपारोहणम् : स आस्तृणाति - इयं ते राट् इति । राज्यमेवास्मिन्नेतद्दधाति । अथैनमासादयति - यन्ताऽसि यमनः । - - - ध्रुवोऽसि धरुणः इति । ध्रुवमेवैनमेतद्धरुणमस्मिँल्लोके करोति । - श.ब्रा. ५.२.१.२५
ॐइष्टकोपधानम् : स उपदधाति - तया देवतया इति । वाग्वै सा देवता । अङ्गिरस्वद् इति । प्राणो वाऽअङ्गिराः । ध्रुवा सीद इति । स्थिरा सीदेत्येतद् अथो प्रतिष्ठिता सीदेति । - श.ब्रा. ६.१.२.२८
ॐउखायाम् निधिः :— तं प्रथयति । वसवस्त्वा कृण्वन्तु गायत्रेण च्छन्दसाऽङ्गिरस्वद् इति । अयं हैष लोको निधिः - - - अङ्गिरस्वदिति । प्राणो वाऽअङ्गिराः । ध्रुवाऽसि इति । स्थिराऽसीत्येतत् । - - पृथिव्यसि । - श.ब्रा. ६.५.२.३
ॐअथ पूर्वमुद्धिमादधाति । रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन च्छन्दसाऽङ्गिरस्वद् इति । अन्तरिक्षं हैष उद्धिः । - - - अङ्गिरस्वदिति । प्राणो वा ऽअङ्गिराः । ध्रुवाऽसि इति । स्थिराऽसीत्येतद् । - श.ब्रा. ६.५.२.४
ॐअथोत्तरमुद्धिमादधाति । आदित्यास्त्वा कृण्वन्तु जागतेन च्छन्दसाऽङ्गिरस्वद् इति । - - ध्रुवाऽसि इति । स्थिराऽसीत्येतत् । द्यौरसि - श.ब्रा. ६.५.२.५
ॐअथैतेन चतुर्थेन यजुषा करोति - विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन च्छन्दसाऽङ्गिरस्वद् इति । - - वैश्वानरा एषु लोकेषूखायामेतेन चतुर्थेन यजुषा दिशोऽदधुः । - - - - ध्रुवाऽसि इति । - श.ब्रा. ६.५.२.६
ॐअथैनामुद्यच्छति - उत्थाय बृहती भव इति । उत्थाय हीमे लोका बृहन्तः । उदु तिष्ठ ध्रुवा त्वम् । - श.ब्रा. ६.५.४.१३
ॐअथैनमभिमन्त्रयते - आयुर्वाऽग्निः, आयुरेवैतदात्मन्धत्ते । आ त्वाऽहार्षम् इति । - - अन्तरभूः । - - ध्रुवस्तिष्ठाविचाचलिः । - - - विशस्त्वा सर्वा वाञ्छन्तु इति । - - मा त्वद्राष्ट्रमधिभ्रशत् इति । - श.ब्रा. ६.७.३.७
ॐअथ तेनैव पुनः परीत्य । दक्षिणत उद्ङ्ङासीनः पूर्वयोरुत्तरामग्रऽउपदधाति । चिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद इति । अथ दक्षिणां - परिचिदसि तया देवतया ऽङ्गिरस्वद् ध्रुवा सीद इति । - श.ब्रा. ७.१.१.३०
ॐस्वयमातृण्णा : तां वै प्रजापतिनोपदधाति । प्रजापतिर्ह्येवैतत्स्वयमात्मनः प्रत्यधत्त । ध्रुवाऽसि इति । स्थिराऽसीत्येतत् । अथो प्रतिष्ठिताऽसि इति । धरुणा इति । प्रतिष्ठा वै धरुणम् । - श.ब्रा. ७.४.२.५
ॐउखेष्टकोपधानम् : ध्रुवाऽसि धरुणा इति । इतो जज्ञे प्रथममेभ्यो योनिभ्योऽअधि जातवेदाः इति । -

श.ब्रा. ७.५.१.३०
ॐप्रथमा चितिः :– संवत्सरोऽसि, परिवत्सरोऽसि - - - - - सुपर्णचिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवः सीद इति - श.ब्रा. ८.१.४.८
ॐद्वितीया चितिः :– स उपदधाति । ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि इति । यद्वै स्थिरं, यत्प्रतिष्ठितं - तद्ध्रुवम् । अथ वाऽएषामेष लोकोऽध्रुव इवाप्रतिष्ठित इव मनस्यासीत् । तमेवैतत्स्थिरं ध्रुवं कृत्वा प्रत्यधत्ताम् । ध्रुवं योनिमासीद साधुया इति । स्थिरं योनिमासीद साधुयेत्येतत् । उख्यस्य केतुं प्रथमं जुषाणा इति । - श.ब्रा. ८.२.१.४
ॐद्वितीया चितिः :–ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि इति । यद्वै स्थिरं, यत्प्रतिष्ठितं - तद्ध्रुवम् । अथ वाऽअस्यैतदस्थिरमिवाध्रुवमिवात्मन आसीत् - तदेवैतत्स्थिरं ध्रुवं कृत्वा प्रत्यधत्ताम् । - श.ब्रा. ८.२.१.१४
ॐतृतीया चितिः :–मूर्द्धाऽसि राड् ध्रुवाऽसि धरुणा धर्त्र्यसि धरणी यन्त्री राड् यन्त्र्यसि यमनी ध्रुवाऽसि धरित्री इति । एतानेवास्मिन्नेतद्ध्रुवान्प्राणान्यच्छति । - श.ब्रा. ८.३.४.६
ॐतृतीया चितिः :–मूर्द्धाऽसि राट् इति । इमं लोकमरोहन् । ध्रुवाऽसि धरुणा इति । अन्तरिक्षलोकम् । धर्त्र्यसि धरणी इति । अमुं लोकम् । - श.ब्रा. ८.३.४.८
ॐयन्त्री राट् इति । अमुं लोकमरोहन् । यन्त्र्यसि यमनी इति । अन्तरिक्षलोकम् । ध्रुवाऽसि धरित्री इति । इमं लोकम् । - श.ब्रा. ८.३.४.१०
ॐचतुर्थी चितिः । अष्टादशस्तोमेष्टकोपधानम् :– ते चेतयमाना एतां चतुर्थीं चितिमपश्यन् - यदूर्ध्वमन्तरिक्षाद् अर्वाचीनं दिवः । तेषामेष लोकोऽध्रुवऽइवाप्रतिष्ठित इव मनस्यासीत् । - श.ब्रा. ८.४.१.२
ॐलोकम्पृणा इष्टका : लोकं पृण च्छिद्रं पृण इति । - - अथो सीद ध्रुवा त्वम् इति । - श.ब्रा. ८.७.२.६
ॐसुत्याह कर्माणि : अथोत्तरे । इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः इति अमृतं वै हिरण्यम् । अमृतपक्षः शकुनो भर्तेत्येतत् । महान्त्सधस्थे ध्रुव आनिषत्तो नमस्तेऽअस्तु मा मा हिंसीः इति । आत्मनः परिदां वदते । - श.ब्रा. ९.४.४.५
ॐअध्रुवं वै तत् - यत्प्राणः । तं ते विष्याम्यायुषो न मध्यात् - श.ब्रा. १०.२.६.१९
ॐसोऽयमात्मा त्रेधा विहित एव । - - - -वाचो रूपेण । वाग्घ्येवैतत्सर्वम् - यत् स्त्री, पुमान्, नपुंसकम् । वाचा ह्येवैतत्सर्वमाप्तम् । तस्मादेना । अङ्गिरस्वद्ध्रुवा सीद इत्येव सर्वाः सादयति । नाङ्गिरस्वद्ध्रुवः सीदेति । नाङ्गिरस्वद्ध्रुवं सीदेति । वाचं ह्येवैतां संस्कुरुते । - श.ब्रा. १०.५.१.३
ॐतस्य वा एतस्य ब्रह्मयज्ञस्य - वागेव जुहूः । मन उपभृत् । चक्षुर्ध्रुवा । मेधा स्रुवः । सत्यमवभृथः । - श.ब्रा. ११.५.६.३
ॐअग्निहोत्रे मह उपस्थानम् : स ह प्रजापतिरीक्षांचक्रे । कथं न्विमे लोका ध्रुवाः प्रतिष्ठिताः स्युरिति । स एभिश्चैव पर्वतैर्नदीभिश्चेमामदृंहत् । वयोभिश्च मरीचिभिश्चान्तरिक्षम् । जीमूतैश्च नक्षत्रैश्च दिवम् । - श.ब्रा. ११.८.१.२
ॐप्रेतस्य अन्त्यकर्म : जुहूं घृतेन पूर्णां दक्षिणे पाणावादधाति । सव्य उपभृतम् । उरसि ध्रुवाम् । मुखेऽग्निहोत्रहवणीम् । - - श.ब्रा. १२.५.२.७
ॐशारीरक ब्राह्मणम् : विरजः पर आकाशादज आत्मा महान् ध्रुवः । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । - बृहदा. उपनि. ४.२.२३

ॐमृत्यो: स मृत्युमाप्नोति य इह नानेव पश्यति । मनसैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् । - बृह.उपनि. ४.२.२२
ॐकिंदेवत्योऽस्यां ध्रुवायां दिश्यसीति । अग्निदेवत इति । सोऽग्नि: कस्मिन्प्रतिष्ठित इति । वाचीति । - - - बृह. उपनि. ३.९.२५
ॐस एष संवत्सर: प्रजापति: षोडशकल: । तस्य रात्रय एव पंचदश कला: । ध्रुवैवास्य षोडशी कला । - - - सोऽमावास्यां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य, तत: प्रातर्जायते । - बृहदा. उपनि. १.३.२२
ॐकपालोपधानमन्त्रा: :- ध्रुवमसि पृथिवीं दृꣳहाऽऽयुर्दृꣳह प्रजां दृꣳह सजातानस्मै यजमानाय पर्यूह धर्त्रमस्यन्तरिक्षं दृꣳह प्राणं दृꣳहापानं दृꣳह सजातानस्मै यजमानाय पर्यूह धरुणमसि दिवं दृꣳह चक्षु: दृꣳह श्रोत्रं दृꣳह - -- घर्मे कपालान्युपचिन्वन्ति - तैत्तिरीय संहिता १.१.७.१
ॐइध्मसंनहनार्था बर्हिरास्तरणार्थाश्च मन्त्रा: :- मित्रावरुणौ त्वोत्तरत: परि धत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडित: - - - - जुहूरुपभृद्ध्रुवाऽसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीद - तै.सं. १.१.११.२
ॐआध्वर्यवा: स्रुग्व्यूहनादिमन्त्रा: । ध्रुवाऽसि यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमाण: । तं त एतमनु जोषं भरामि नेदेष त्वदपचेतयातै (ध्रुवाऽसीत्यन्तर्वेदि पृथिवीमभिमृशति) - तै.सं. १.१.१३.२
ॐमध्यमोपसद्दिने स्वीकृतषट्त्रिंशत्पदपरिमितवेदिप्रदेशपूर्वभाग उत्तरवेद्यभिधानम् : सिꣳहिरसि महिषीरस्युरु प्रथस्वोरु ते यज्ञपति: प्रथतां ध्रुवाऽसि देवेभ्य: शुन्धस्व - - तै.सं. १.२.१२.२
ॐउत्तरवेदिसमीपवर्तिहविर्धानाभिधानम् : विष्णो: स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा (इति अध्वर्युर्दक्षिणं बाहुं स्यूत्वा विष्णोर्ध्रुवमसीति प्रज्ञातं ग्रन्थिं करोति) - तै.सं. १.२.१३.३
ॐअग्नीषोमीयपश्वङ्गत्वेन पूर्वोक्तशेषभूतसदोनिर्माणादि :- द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणयोर्ध्रुवेण धर्मणा (अथ औदुम्बरीं प्राचीनकर्णामुच्छ्रितामवटे प्रक्षिपेत्) - तै.सं. १.३.१.२
ॐध्रुवग्रहाभिधानम् : मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवा: । उपयामगृहीतोऽस्यग्नये त्वा वैश्वानराय ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तम एष ते योनिरग्नये त्वा वैश्वानराय - तै.सं. १.४.१३.१
ॐहूयमानस्य हविषो बहि:स्कन्दननिवारणाय परिवीयमानानां परिधीनामनुमन्त्रणम् : (हे मध्यम परिधे) ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता - - - तै.सं. १.६.२.१
ॐआप्यायनादिमन्त्रा: :- आ प्यायतां ध्रुवा घृतेन यज्ञंयज्ञं प्रति देवयद्भ्य: । - तै.सं. १.६.५.१
ॐहवि:सादनविधि: :- ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमित्याह ध्रुवानेवैनान्कुरुत - तै.सं. १.६.१०.१
ॐध्रुवां वै रिच्यमानां यज्ञोऽनु रिच्यते यज्ञं यजमानो यजमानं प्रजा ध्रुवामाप्यायमानां यज्ञोऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजा आ प्यायतां ध्रुवा घृतेनेत्याह ध्रुवामेवाऽऽप्याययति - तै.सं. १.७.५.१
ॐवायव्य पशु: :-नियुत्वते भवति ध्रुवा एवास्मा अनपगा: करोति वायवे नियुत्वत आ लभेत प्रजाकाम: प्राणो वै वायुरपानो नियुत् - तै.सं. २.१.१.२
ॐ (हे मध्यमपरिधे) ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासम् (धीर - मित्र, उग्र - वरुण) - तै.सं. २.३.६.१
ॐसांग्रहणीष्टिविधि: :- मनोग्रहणं वै संग्रहणं मन एव सजातानाम् गृह्णाति ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु

भूयासमिति परिधीन्परि दधाति - तै.सं. २.३.६.३
ॐदिवि देवान्दृꣳहान्तरिक्षे वयाꣳसि पृथिव्यां पार्थिवान्ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसि । (इति पुरस्तात्प्रत्यङ्ङासीनो होतृचमसे ध्रुवमवनयति) - तै.सं. ३.२.८.६
ॐयत्राहुतिः प्रत्यतिष्ठत्ततो विकङ्कत उदतिष्ठत्ततः प्रजा असृजत तस्य वैकङ्कती ध्रुवा भवति - तै.सं. ३.५.७.३
ॐउखानिर्माणम् : दिशोऽसि ध्रुवाऽसि धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ - तै.सं. ४.१.५.४
ॐउखासंस्काराभिधानम् : उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वम् । - तै.सं. ४.१.६.३
ॐआसन्द्यामुखाग्निस्थापनप्रतिपादनम् : आ त्वाऽहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्त्वस्मिन्राष्ट्रमधि श्रय । - तै.सं. ४.२.१.४
ॐगार्हपत्यचयनम् : चिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद परिचिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद (एवं पश्चात् समीची तिरश्ची वा द्वे) - तै.सं. ४.२.४.४
ॐआहवनीयचयनार्थलोष्टक्षेपाद्यभिधानम् : चितः स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाऽङ्गिरस्वद्ध्रुवाः सीदत । (इत्यपरिमिताभिः शर्कराभिराहवनीयचितेशयतनं परिश्रयति) - तै.सं. ४.२.७.४
ॐस्वयमातृण्णादीष्टकोपधानाभिधानम् : ध्रुवाऽसि धरुणाऽस्तृता विश्वकर्मणा सुकृता ।(इति स्वयमातृण्णामभिमृश्याश्वेनोपघ्राप्य च प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठ इत्यविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति) - तै.सं. ४.२.९.१
ॐअग्निस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । - तै.सं. ४.२.९.२
ॐद्वितीयचितावाश्विन्याख्येष्टकाभिधानम् : ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि ध्रुवां योनिमासीद साध्या । - तै.सं. ४.३.४.१
ॐतृतीयचितौ स्वयमातृण्णादीष्टकाभिधानम् : वायुस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । - तै.सं. ४.३.६.२
ॐबृहत्याख्येष्टकाभिधानम् : मूर्धाऽसि राड्ध्रुवाऽसि धरुणा यन्त्र्यसि यमित्री (इति सप्त वालखिल्याः पुरस्तात्प्रतीचीः) - - तै.सं. ४.३.७.२
ॐचोडाख्येष्टकाभिधानम् : सूर्यस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । - तै.सं. ४.४.३.३
ॐविश्वज्योतिरादीष्टकाभिधानम् : - - -वर्चोदां त्वा वर्चसि द्रविणोदां त्वा द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । - तै.सं. ४.४.६.२
ॐऋतव्याख्येष्टकाभिधानम् : ध्रुवा च पृथिवी च देवस्य सवितुर्मरुतां वरुणस्य धर्त्री च धरित्री च मित्रावरुणयोर्मित्रस्य - तै.सं. ४.४.११.२
ॐध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता । - तै.सं. ४.४.१२.५
ॐअग्निस्थापनाभिधानम् : ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः (चतुर्थः मरुतां गणः) - तै.सं. ४.६.५.६
ॐवसोर्धाराभिधानम् : ध्रुवश्च मे वैश्वानरश्च मे - तै.सं. ४.७.७.१
ॐअग्नियोगाभिधानम् : इन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युर्महान्त्सधस्थे ध्रुवः आ

निषत्त: । नमस्ते अस्तु मा मा हिꣳसी: (पुरस्तात्प्रातरनुवाकादग्निं युनज्मीति तृसृभिरभिमृशन्नग्निं युनक्ति) - तै . सं . ४ . ७ . १३ . १
ॐआसन्द्यां वह्निस्थापनं वात्सप्रेणोपस्थानं च - ध्रुवस्तिष्ठाविचाचलिरित्याह प्रतिष्ठित्यै - तै . सं . ५ . २ . १ . ४
ॐप्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेतीमामेवेष्टकां कृत्वोपाधत्तानतिदाहाय - तै . सं . ५ . ५ . २ . ४
ॐउखासंस्कार : :– उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्या - तै . सं . ५ . १ . ७ . ४
ॐहिरण्येष्टकादेरभिधानम् : - - - वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद - तै . सं . ५ . ५ . ५ . ४
ॐषष्ठे ऽह्नां रूपादय : :– तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेत्याहैषा वा इष्टकानां प्रतिष्ठा - तै . सं . ५ . ५ . ६ . ३
ॐउत्तरवेदिनिरूपणम् : ध्रुवा असीति सꣳहन्ति धृत्यै - तै . सं . ६ . २ . ७ . ३
ॐव्याघारणविधि : :– विष्णो : स्यूरसि विष्णोर्ध्रुवमसीत्याह वैष्णवꣳ हि देवतया हविर्धानं यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत्तं विस्त्रꣳसयेदमेहेनाध्वर्यु : प्र मीयेत तस्मात्स विस्त्रस्य : - तै . सं . ६ . २ . ९ . ४
ॐसदोभिधानम् : इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमसीत्याहैन्द्रꣳ हि देवतया सदो यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत्तं न विस्त्रꣳसयेदमेहेनाध्वर्यु : प्र मीयेत तस्मात्स विस्त्रस्य : - तै . सं . ६ . २ . १० . ७
ॐध्रुवग्रहकथनम् : आयुर्वा एतद्यज्ञस्य यद्ध्रुव उत्तमो ग्रहाणां गृह्यते तस्मादायु : प्राणानामुत्तमं मूर्धानं दिवो अरतिं पृथिव्या इत्याह मूर्धानमेवैनꣳ समानानां करोति वैश्वानरमृताय जातमग्निमित्याह वैश्वानरꣳ हि देवतयाऽऽयुरुभयतोवैश्वानरो गृह्यते तस्मादुभयत : प्राणा अधस्ताच्चोपरिष्टाच्चार्धिनोऽन्ये ग्रहा गृह्यन्तेऽर्धी ध्रुवस्तस्मात् अर्ध्यवाङ्प्राणोऽन्येषां प्राणानामुपोप्तेऽन्ये ग्रहा : साद्यन्तेऽनुपोप्ते ध्रुवस्तस्मादस्थ्नाऽन्या : प्रजा : प्रतितिष्ठन्ति माꣳसेनान्या - - - - तै . सं . ६ . ५ . ३ . १